International Journal of Advanced Educational Research
ISSN: 2455-6157; Impact Factor: RJIF 5. 12
www.educationjournal.org
Volume 2; Issue 3; May 2017; Page No. 108-109

# ब्राह्मणग्रन्थानां देशकालयोः समीक्षणम् अनुपलब्धब्राह्मग्रन्थाश्च

**माया यादव**

प्रवक्ता संसकृत, रा. व. मा. वि. नाहड़, रेवाड़ी, हरियाणा, भारत।

**प्रस्तावना**

ब्राह्मणग्रन्थेषु उपलब्धभौगोलिकविवरणे स्पष्टः भवति यत् एतेषां ब्राह्मणग्रन्थानाम् उदयस्थानं कुरुपाञ्चालप्रदेशः तथा सरस्वतीनद्याः प्रदेशोऽस्ति। ताण्ड्यब्राह्मणस्य सारस्वतप्रदेशेन सह घनिष्टः सम्बन्धोऽस्ति। सरस्वती नदी यत्र लुप्ताऽभवत् तस्य स्थानस्य नाम "विनशनम" अस्ति। तस्याः पुनरुदग्मस्थानस्य अभिधानं प्लक्षप्रास्त्रणवम् अस्ति। (ताण्डय0 25/10/21)

सरस्वतीदृषद्व्त्योः मध्यवर्तिप्रदेशस्य सड.मस्थानस्य चापि निदेशो मिलति। प्रजापतेः यज्ञस्य प्रतीकत्वेन कुरुक्षेत्रम् यज्ञवेदिः सिध्दा भवति, अर्थात् ब्राह्मणा यागाय अस्मिन्नेव प्रदेशे ब्राह्मणानां संड्.कलनं कृतम् आसीत। यज्ञयागानां पूर्णप्रतिष्ठा अपि अस्मिन्नेव प्रान्तेऽभवत्। मनुस्मृतौ दृषदव्ती-सरस्वत्योः उभयोः देवनद्योः मध्यवर्तीप्रदेशः ब्रह्मावर्तः नाम्ना ख्यातोऽभवत्।

(मनु. 2/22) अस्यैव प्रान्तस्य भाषा राष्ट्रभाषा अभवत्। अत्रत्याचारः समस्तभारतवर्षस्य मान्याचारः अभवत्। अत्रत्या संस्कृतिरेव विकासमाना समस्तवर्षस्य संस्कृतिरस्ति।

ऋग्वेदीयब्राह्मणेषु उपलब्धसड्.केतेन विदितो भवति यत् तस्मिन् काले भारतस्य उत्तरस्यां दिशि हिमालयपर्वतमाला, प्रतीच्यां दिशि शुष्कमरुस्थलः तथा च दक्षिणस्यां प्रदेशाः आसन्। ऐतरेयब्राह्मणस्य सम्बन्धः मध्यदेशेन सह विशेषरूपेण प्रतीयते, यतः अत्र मध्यदेशस्य वर्णनं विशेषतेऽस्ति। कौषीतकिब्राह्मणस्य रचना संभवतः उत्तरभारते जातम्। चरणव्यूहानुसारेण उत्तरगुर्जरप्रदेशे अस्य ब्राह्मणग्रन्थस्य प्रचलनमासीत्। सर्वेषु ब्राह्मणग्रन्थेषु यज्ञः सर्वोच्चस्थानं प्राप्नोति।

शतपथब्राह्मणम् अतिप्रचीनं मन्यते। अस्मिन ग्रन्थे स्वराणां प्रयोगः विधिवद् उपलब्धो भवति। अस्य सर्वमान्ये प्रचीनतमे दि्वतीयकाण्डे एका अतीव महत्वशालिन्याः घटनायाः उल्लेखः ज्योतिषशास्त्रानुसारी मिलति। अस्य आशयः अस्ति-कृतिका पूर्वस्यां दिशि उदिता भवति तथा च ततः प्रच्युता न भवति। अस्य घटनायाः स्थितिः प्रसिध्दज्योतिषाचार्यस्य बालकृष्णदीक्षितस्य गणनानुसारेण विक्रमात् सहस्त्रत्रयवर्षपूर्वम एव भवितव्यम्। विण्टरनित्जमहोदयेन इयं ग्रहस्थितिः ख्रीष्टात् 1100 पूर्वं निश्चिता। वेदाड्.गज्योतिषग्रन्थः सर्वसम्मत्या शतपथब्राह्मणात् अर्वाचीनरचना अस्ति। अस्य कालः ख्रीष्टात् चतुर्दशशतवर्षपर्वं मान्य अस्ति। डा. मैक्समूलरः अपि अस्या रचनायाः समय ख्रीष्टात् 1181 ई. पू. वर्षानन्तरं स्वीकर्तुं कथमपि सन्नद्धो नास्ति। तस्मात् दीक्षितस्य मतानुसारेण अस्य शतपतब्राह्मणस्य कालः ख्रीष्टात् सहस्त्रयवर्षपूर्वमेव स्वीकर्तुं शक्यते। अयं ब्राह्मणकालः ख्रीष्टात् सहस्त्रयवर्षपूर्वात आरभ्य ख्रीष्टात् सहस्त्रदव्यवर्षपूर्व- पर्यन्तमासित्। प्रचीनतमत्वेन शतपतब्राह्मण् अर्वाचीनत्वेन च गोपथब्राह्मणं समायाति।

समस्तब्राह्मणग्रन्थाः गद्ये एव निबध्दाः सन्ति। किन्तु मध्ये मध्ये तस्मिन् युगे बहुप्रचलितपद्यबध्दगाथाः अपि समाविष्टाः सन्ति। यथा-ऐतरेयब्राह्मणे हरिश्चन्द्रोपाख्यानम्, यत्र अभिव्यकतेः सबलतायै उपमारूपकाणां प्रचुरः प्रयोगः वर्तते। ब्राह्मणग्रन्थानां गद्यबन्धः अतीव परिमार्जितः, प्रसन्न उदातः चास्ति। गद्ये भाषायाः नैसर्गिकरूपं दृश्यते। दीर्घसमासस्य अभावेन अर्थज्ञाने कापि दुरूहता न भवति। भगवतीभागीरथ्याः भव्यप्रवाह इव ब्राह्मणानां गद्यं प्रवहमानं वर्तते। भाषा मन्त्राणां भाषा इव अस्ति, तथापि प्रचीनशब्देभ्यः पराङ्मुखो भूत्वा अभिनवशब्दग्रहणे न कापि विप्रतिपत्तिः अस्ति ब्राह्मणानां भाषा पाणिनेः भाषया सह संहिताभाषां संयोजयन्ती मध्यवर्तिनी श्रृड्.खला इव कार्यं करोति। वाक्ये शब्दानां क्रमः स्पष्टः, सरलः, प्रसन्नपदयुक्तश्च। यज्ञीयविधानवर्णने नीरसतायाः सम्भावना भवति, तथापि तत्र गद्यं लघुवाक्येषु विन्यस्तं अस्ति। तेन हि तत्र पर्याप्तरूपेण रोचकता, आकर्षकता हृदयावर्जकता च वर्तते। आख्यायिकायाः अंशः तु विशेषरूपेण हृदयड्.गमो भवति। यथा- सत्यं वै चक्षुः सत्यं हि वै चक्षुस्तस्मात् यदिदानीं दौव् विवदमानावेयाताम्- अहमदर्शम् अहमश्रौषम् इति। यः ब्रूयात् अहमदर्शमिति तस्मा एव श्रध्दयाम। तत् सत्येनैवैतत् समर्थयति। उपसर्गाणाम् उन्मुक्तप्रयोगः पूर्ववदस्ति। निपातानामपि बाहुल्यमस्ति। यत्र तत्र लाक्षणिकतायाः दर्शनं भवति। ब्राह्मणानां भाषा सस्वरा, सुव्यवस्थिता, नियमनिष्ठा प्रवाहपूर्णा चास्ति।

ब्राह्मणग्रन्थेषु वर्णितं यागानुष्ठानं वैदिकयुगस्य क्रियाकलापानाम् एकं भव्यं चित्रं प्रस्तौति। धार्मिकदृष्टया इदं उपादेयं सड्ग्रहणीयं मननियं चास्ति। तत्कालीनज्ञः कर्मणां वैज्ञानिकसंस्था मन्यते। ब्राह्मणग्रन्थेषु निरूक्तस्य निर्वचानानां मूलाधारःप्राप्यते। पुराणसाहित्ये विकसितानां आख्यायानां मूलभूमिः अपि ब्राह्मणग्रन्थाः एव सन्ति। कर्ममीमांसायाः प्रादुर्भावः विकासश्च ब्राह्मणग्रन्थेभ्यः एवाजायत्। ब्राह्मणग्रन्थानामनुशीलनेन ज्ञायते यत् तस्मिन् काले यज्ञ यागादिविषये विदव्तसु शास्त्रार्था अभवन्। तत्कारणादेव मीमांसाशास्त्रस्य उत्पत्तिरभूत्। अस्यैव मीमांसाशास्त्रस्य तर्कपध्दत्यानुसारेण यज्ञीयविषयाणां विमर्शो भवितुं शक्यते। ब्राह्मणग्रन्थेषु यज्ञीयविषयकमीमांसकाः विद्वांस ब्रह्मवादिनः कथ्यन्तेः। ब्राह्मणस्य अध्यनेन बहुविधशास्त्राणाम् उदयस्य कथा ज्ञातुं शक्यते। यज्ञीयावश्यकतासम्पूर्त्यर्थम् इदं शास्त्र आविर्भूय स्वविकासस्य कथा सार्वभौमक्षेत्रेऽपि कथं केन प्रकारेण वा सृजति? इति स्वयमेव ब्राह्मणग्रन्थमाध्यमेन प्रतिपाद्यते। एतरेयब्राह्मणस्य अनुंशीलनेन ज्ञायते यत् अस्मिन् युगे केन प्रकारेण विष्णोः महिमा वैदिकसमाजे विशिष्टं स्थानं प्रापनोति।

शतपथब्राह्मणस्य मनोरमरीत्या वैदिकविधानस्य याज्ञिकव्यवहारस्य च वर्णनं करोति। याज्ञीयानुष्ठानस्य क्षुद्रातिक्षुद्रस्यापि विधिविधानस्य विशदवर्णनमत्र अस्ति। पुराणेषु उल्लिखितमत्स्यावतारस्य बीजं शतपथब्राह्मणस्य एव कथायामस्ति। येन ज्ञतो भवति यत् केन प्रकारेण मनुः मानवीयसृष्टिं मत्स्यसाहाय्येन जलौघात् त्रातुं समर्थोऽभवत्। जलोघे यदा मानवानां विनाशोऽभवत्, यदा पुनः तेन सञ्चितबीजेन मनुना अस्मिन् भूतले प्रादुर्भाव व्यधात्। इयं घटना हिमालयस्य उपरि घटिता आसीत्। एवंविधस्य प्रलयकारिणः जलौघस्य घटना प्राचीनबाइबिलनामके धर्मग्रन्थे अपि दृश्यते।

ब्राह्मणग्रन्थो नाम वेदस्य व्याख्यानम्। ब्राह्मणग्रन्थानामपि मन्त्राणामिव अपौरुषेयता अस्ति। ब्राह्मणसाहित्यं नितरां व्यापकं च वर्तते। ब्राह्मणग्रन्थेषु वैदिकयज्ञानां सर्वांगपूर्ण विवरणं प्राप्यते। व्याकरणस्य निर्वचनस्य च मौलिकी उद्भावना ब्राह्मणग्रन्थेषु एव दृश्यते। ब्राह्मणानि आख्यायानं स्त्रोतांसि सन्ति, मीमांसादर्शनस्य आधारश्च। संहितायुगात् उपनिषदां युगपर्यन्तं या वैदिकभाषा निरन्तरं विकसिता भवति स्म, तस्याः स्पष्टं सोपान ब्राह्मणग्रन्थानां भाषायां

प्राप्यते। ब्राह्मणग्रन्थेषु इतिहासभूगोलयोः अध्ययनस्य प्रचुरसामग्री निहितास्ति। अत्र प्राचीनतायाः भाषायाः अध्ययनस्य पर्याप्तसामग्री प्राप्यते। विशेषरूपेण वैदिकवाक्यविज्ञानस्य अध्ययनं ब्राह्मणसाहित्यं विना नैव संभवति।

**अथ कतिपयानि अनुलब्धब्राह्मणानि सन्ति-**

**ऋगवेदीयानि-** 1 पैङ्गि, पैङ्ग्य् अथवा पैङ्गायणिब्राह्मणम् 2. तवल्कार 3.बह्वृब्राह्मणम् 4. आश्वलायनब्राह्मणम् 5. गालवब्राह्मणम्

**यजुर्वेदीयानिः** 6. चरकब्राह्मणम् 7. श्वेताश्वतरब्राह्मणम् 8. काठकब्राह्मणम् 9. मैत्रायणीब्राह्मणम् 10. जाबालब्राह्मणम् 11.खाण्डिकेयब्राह्मणम् 12. औरवेयब्राह्मणम् 13. हारिद्रविक- ब्राह्मणम् 14. तुम्बुरुब्राह्मणम् 15. आह्वरकब्राह्मणम् 16. कङ्कतिब्राह्मणम् 17. छागलेयब्राह्मणम्।

**सामवेदीयानिः** 18. भाल्लविब्राह्मण् 19. कालबविअब्राह्मणम् 20.रौरूकिब्राह्मणम् 21. शाटयायन ब्राह्मणम्।

**अनिश्चितशाखासम्बन्धी अनुपलब्धब्राह्मणानि सन्ति।**

1.आरुणेयब्राह्मणम् 2. सौलभब्राह्मणम् 3. शैलालीब्राह्मणम् 4. पाराशरब्राह्मणम् 5. भाषशराविब्राह्मणम् 6. कापेयब्राह्मणम् 7. रहस्याम्नायब्राह्मणम् 8. निरुक्तब्राह्मणम्

ब्राह्मणग्रन्थानां प्रधानविषयः आधिदैविकाध्यात्मिकतत्वानां विवेचनं वर्तते। ब्राह्मणग्रन्थाः सर्वथा गद्यात्मका एव ब्राह्मणानां विधानं कदा भवितव्यम? केन प्रकारेणा तत्कर्म कर्त्तव्यम? किमाकाराणां साधनानामवश्यकता भवति? के च तेषां यज्ञानामधिकारिणो भवन्ति। एवं विधानां याज्ञिकविधीनां प्रतिपादनायैव ब्राह्मणसाहित्यस्य समुदयः अभवत्। याज्ञिकविषये यत्र तत्र कश्चन विरोधोऽपि प्रतीतः भवति, तस्य परिहारोऽपि ब्राह्मणस्य उध्देश्यमस्ति।

ब्राह्मणस्य अपरविषयः अर्थवादः अस्ति। अर्थवादे निन्दास्तुत्योः निवेशनमस्ति। अर्थवादे यागानिषध्दवस्तूनां निन्दा अस्ति तथा यागोपयोगिनां द्रव्याणां प्रशंसा वर्तते। विधिविधानं च सयुक्तिं भवति। निरुक्तिजन्यार्थेनाऽपि ब्राह्मणवाक्यानां समर्थनं भवति। ब्राह्मणग्रन्थानां प्रतिपाद्यविषये एतेषां दशवस्तूनां निर्देशः प्राप्यते-

> **"हेतुनिर्वचनं निन्दा प्रशंसा संशयो विधिः।**
> **परक्रिया पुराकल्पो व्यवधारण-कल्पना**
> **उपमानं दशैते तु विधयो ब्राह्मणस्य तु"।।**

ब्राह्मणग्रन्थेषु मन्त्राणां विनियोगस्य प्रथमवतारो भवति। कस्य मन्त्रस्य प्रयोगः कस्मिन कर्मणि भवति, अस्य सयुक्तिकं व्यवस्था ब्राह्मणग्रन्थे सर्वत्र उपलब्धो भवति। हेतुपदेन तत्र कारणानां निर्देशो भवति, येन कर्मकाण्डविधिः विशेषरूपेण सम्पन्नो भवति। ब्राह्मणग्रन्थेषु शब्दानां निर्वचनस्य स्थाने स्थाने निर्देशः प्राप्यते। अयं निर्देशः मार्मिकः वैज्ञानिकश्चास्ति। भाषाशास्त्रदृष्टयाऽपि अयमतीव महत्वपूर्णः प्रतीयते। ब्राह्मणग्रन्थेषु यदा कदा स्वल्पकायमाखयानम् दीर्घकायमाख्यानं च लभ्यते। सृष्टिविष्येऽपि अनेकानि आख्यानि समुपलब्धानि सन्ति। परमपुरुषात् चतुर्णां वर्णानां उत्पत्तेरुल्लेखः अपि प्राप्यते। कतिपयेषु आख्यानेषु साहित्यिकसौन्दर्यस्य तथा रुचिरकल्पनायाः च सुष्ठु अभिव्यञ्जना वर्तते। यथा पुरुरवाउर्वशी- आख्यानं, शुनः शेपस्याख्यानमित्यादयः।

ब्राह्मणग्रन्थेषु आत्मनः अस्तित्वं, पुनर्जन्म, अमरात्मा, प्रजापतिः, त्रिलोकः, मानवायुः पूर्णायुभोगस्योपायः, सुखीगृहस्थः, गार्हस्थये स्त्रियाः स्थानं, विवाहः, सत्यम्, पापं, यज्ञस्य स्वरुपं, यज्ञानां मुख्यभेदाः, पापविमोचनं, बलिदानं, देवता, आपः, हिरण्गर्भः, अग्निः, वृष्टिः, वर्षा, समुद्रः, सूर्यः, प्राणापानः, पृथिव्याः इतिहासः, आर्दा (शिथिला) पृथ्वी, आग्नेयी पृथिवी, अग्निगर्भा पृथिवी, परिमण्डला पृथिवी, अयस्मयी पृथिवी, अन्तरिक्षं, अन्तरिक्षस्थः पशुः, रेखागणितं, स्वर्ग इत्यानां वर्णनं प्राप्यते। संक्षेपेण वक्तुं शक्यते यत् ब्राह्मणानां विषयसामग्रयां, सन्ति-विधिः, अर्थवादः (निन्दा-प्रशंसा, विनियोगः) निरुक्तिः निर्वचनं, प्रतीकात्मकता आख्यानञ्च। अनेन प्रकारेण वयं वक्तुं शक्नुमः यत् ब्राह्मणसाहित्यम् अतीवविशालसाहित्यम् आसीत्।

**।।इति शम्।।**